New No: ९ | १

Section. ७

No: 383
of 1883-84

Microfilmed

Name सर्वसम्मतशिक्षा (विवरणसहिता)

Author. म० कश्यप: Age.
व्या० आठल्ये मांगोपाद्

Extent: *foll.* lines. letters.

६ | १०

अथ सर्वशिक्षाव्याख्याप्रारंभः ॥ पत्र २९

श्रीगणेशाय नमः ॥ ॥ॐ गणेश्वरं प्रणम्याहं लोकपालानुग्रहान्गुरून् । सर्व
संमतशिक्षाया वक्ष्ये व्याख्यानमुत्तमं ॥१॥ आशीष्पितस्य ग्रंथस्याविघ्नेन परिसमा
प्तये ॥ प्राचगमनाय शिष्याचारपरिप्राप्तेष्टदेवतानमस्कारपूर्वकं ग्रंथारंभः प्रतिजा
नीते ॥ गणेशं वरदं देवं प्रणिपत्य गजाननं ॥ द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसं
मतं ॥१॥ गणेशं गणपतिं वरदं इष्टदेवतां विघ्नानां विनायकं गजाननं गजवक्त्रं
प्रणिपत्य भक्तितो नत्वा द्वित्वादीनां द्वित्वमादिर्येषां द्वित्वपूर्वागमलोपागमवि
कारादीनां सर्वसंमतं सर्वेषां तैत्तिरीयाख्योपयोगिनां प्रातिशाख्यप्रभृतीनां ल
क्षणानां संमतं समानार्थं लक्षणं लक्ष्यते प्रकाश्यते नेनेति लक्षणं प्रवक्ष्यामि नि
र्णयं रचयिष्यामि ॥ स्वराद्द्वित्वमवाप्नोति व्यंजनं व्यंजने परे ॥ अथ वर्णसमाम्नायः
अथ नव आदितः समानाक्षराणि ॥ द्वे द्वे सवर्णे ह्रस्वदीर्घे ॥ न प्लुत पूर्वं ॥ षोडशादि
तः स्वराः ॥ शेषो व्यंजनानि ॥ आद्याः पंचविंशतिस्पर्शाः ॥ परा श्चतस्रोंतस्थाः ॥ परे

षड्वक्ष्याच्चुः ॥ स्पर्शानामानुपूर्व्येण पंचपंचवर्गाः ॥ प्रथमद्वितीयतृतीयचतुर्थोत्तमाः ॥
ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः ॥ नहकारः ॥ व्यंजनशेषो घोषवानितिवर्णसं
ज्ञापराणिसूत्राणि अनुसृत्यव्यवहृत्वाचार्यैः ॥ स्वरादुत्तरं व्यंजनं व्यंजनेपरे सतिद्वि
रुद्वयोर्वर्णयोः समानाकृतं वर्णद्वयमाप्नोति ॥ यथा ॥ यत्तस्य ॥ स्वरइति किं ॥ प्रज
ननं ज्योतिः ॥ पकारेमाभूत् ॥ व्यंजनपरइति किं ॥ दिवावै ॥ वकारेमाभूत् ॥ व्यंजनंइ
ति किं ॥ प्रउगं ॥ उकारेमाभूत् ॥ प्रातिशाख्ये ॥ स्वरएवव्यंजनं द्विवर्णमित्युक्तं ॥ ननु
द्वयोर्वर्णयोः समाहारइत्युक्तत्वात् स्पंनिरंतरत्वदर्शयितुं तेनवर्णसंधिप्रयुक्तार्थमा
त्रविरामस्यासंभवः ॥ सन्धितो भवतीति ॥ स्पर्शलिकारस्वरेयोव पूर्वश्च द्विरुच्यते ॥ ए
लकारपूर्वेविकारपूर्वो यः स्पर्शः द्विरुच्यते ॥ द्वित्वमाप्नोतीत्यर्थः ॥ यथा ॥ कल्यांजु
होति ॥ विभक्तावृत्तं ॥ लकारपूर्वइति किं ॥ सर्पाः ॥ स्पर्शइति किं ॥ कल्याणी ॥ मकारे
माभूत् ॥ दिव्या धिया ॥ स्वरपूर्वस्यरेफस्यपरस्तात् व्यंजनं स्थितं ॥ आपद्यते द्विवर्णं

तद्वर्णमात्रेपरेसति॥ आस्वरः पूर्वो यस्मात् तस्य रेफस्य परस्तात्॥ उत्तरत्रावस्थितं
व्यंजनं वर्णमात्रे स्वरे वा व्यंजने वा परे सति द्विवर्णं द्वित्वमापद्यते॥ यथा ऊर्क्के मे॥ स्व
रपूर्वस्येति किं॥ त्र्यंबकं॥ रेफस्येति किं। कल्याणी॥ व्यंजनमिति किं॥ द्वेरत्रानेतर्णमा
त्र इति किं॥ ऊर्क्॥ संयोगादिरियात् द्वित्वमनुस्वारात्परस्थितः॥ संयोगो नाम निरंतरे व्यं
जने उच्यते॥ तस्यादिभूतव्यंजनं यत् अनुस्वारात्परस्थितं तद्द्वित्वमियात् प्राप्नु
यात्॥ यथा॥ सꣳश्रवाः॥ अनुस्वारादिति किं श्रेयाजनं॥ मनःक्षेमे॥ संयोगादिति किं॥ ताꣳ
हस्ते॥ अनुस्वारो द्विरुच्येत संयोगे परतः स्थिते॥ ५॥ संयोगपरतः स्थिते सति यो अनुस्वारो
ह्रस्वपूर्वः स द्विरुच्यते॥ यथा सꣳश्रवाः॥ संयोग इति किं॥ सꣳहितं॥ ह्रस्वपूर्व इति किं॥
त्रीꣳ स्तृचानानु॥ ह्रस्वपूर्व इति कथं लभ्यते॥ मात्रा द्विमात्रानुस्वारो द्विमात्रा न मात्र एव नु॥ त्रिव २
मात्रिकादपि संयोगे मात्रिकस्य द्विरूपवत्॥ ६॥ इति वचनात्॥ अस्यार्थः॥ मात्रिका
दुत्तरोनुस्वारो द्विमात्रिको भवति॥ यथा॥ सꣳहितं मे। द्विमात्रादुत्तरस्तु मात्रिक एव भ

वति॥यथा। ताँ हस्तो। संयोगेतुपरेमात्रिकादुत्तरोप्यनुस्वारोमात्रिक एव द्विरूपवत्॥ द्वि
रूपसदृशो भवति। द्वित्वमाप्नोतीति यावत्॥ यथा॥ सँ श्रवाः। अत्रमात्रिकादुत्तरस्य
संयोगे द्वित्वविधानात् द्रुस्वपूर्वोक्तिः॥ यद्यपि अनुस्वारो द्विमात्रस्याद्रेफरूभापरेषु
च॥ संयोगेपरतस्तस्यान्मात्रिकस्तु द्विरूपवदित्यत्रसंयोगपरत्वमात्रं द्वित्वप्रयोजकं
प्रतीयते तथाप्युक्तं शिक्षादिविरोधायैवमेवमंतव्यं॥ ननुसंयोगपरतस्यद्वितिवच
नबलात्संयोगवत्वोपाधिनानुस्वारस्यद्वित्वविधानान्मात्रिकादपीत्यनेनास्यप्रतिषेधा
च्छत्रीँ स्तन्वानित्यादावनुस्वारस्य किं नस्याद्वित्वमिति चेत्॥ हंत ब्राह्मणे १ पदत्यनेन
ब्राह्मणत्वोपाधिनादधिदानस्य विधानात्कौंडिन्यवाक्यनास्यप्रतिषेधात्कौंडिन्यस्य
किं॥ नदधिविधीयतइतिप्रतीयानां॥ तथापिप्रियंगुप्रभृतिरप्यग्नेयपुरोडाशः॥
गर्दभदशानादानेप्यादानमंत्रः॥ किंनांगी क्रियते॥ अथतत्राग्नेयप्रकृतिद्रव्यत्वेनवि
शेषणेनान्यत्रसाध्यादानविषयस्यचदशानांयाश्वाश्वसंबंधित्वेनाविशेषणंनायं

स॰त्रि॰
३

प्रसंग इति चेत्॥ एवं चेदनुस्वारद्वित्वस्यापि मात्रिकोत्तरत्वेन विशेषणान्न दीर्घोत्तर
स्य तत्सिद्धिरिति॥ ननु मात्रिकादनुस्वारो मात्रिको भवति॥ संयोगे तु परभूते द्वित्वं॥
इति विवक्षितत्वाद्द्विमात्रादनुस्वारस्यापि द्वित्वसिद्धिरिति चेत्॥ तदानीं पूर्वविरोधा
पत्तेः॥ पूर्वं न द्विमात्रिकादुत्तरोनुस्वारो द्विमात्रिक इत्युक्तं॥ अत्र तु मात्रिकत्वमिति य
थाप्येवं तथापि न पूर्वविरोधः॥ पूर्वत्र संयोगपरस्यत्वाविवक्षितत्वादिति चेत्॥ तदा
नीं द्विरूपवदिति एतावन्मात्रस्य सामर्थ्याद् इत्यर्थापत्तेः॥ ननु काकाक्षवत्संयोगप
रत्वे तत्रापि संबध्यते॥ अनुस्वारोपि प्रकरणाल्लभ्यत इति॥ न सापेक्षत्वदोष इति चेत्॥
न तदानीं वाक्यभेददोषस्य परिहार्यत्वात्॥ पक्षांतरे तु विशिष्टविधानेनावृत्त्या द्वि
तदभावात्॥ किंच तदानीं संयोगे परभूते स्यान्मात्रिकस्य द्विरूपवदिति एतावता कार्य
सिध्येन्मात्रिकादपीति विशेषणस्यानर्थक्यमापद्येत द्विमात्रानुस्वारः संयोगात्संयोगप
रस्य पूर्ववाक्ये नैव मात्रिकत्वविधानात्संयोगपरत्वे पि मात्रिकस्य तेनैव सिद्धेरत्र दीर्घस्य ३

स्यमात्रिकत्वविधानात्रांकायां अभ्युदयादेव मात्रिकपूर्वस्यानुस्वारस्यानेन मात्रिकत्वं
विधीयत इति अंतरेणापि मात्रिकादपीति ग्रहणमवगति सिद्धेः ॥ तस्मान्मात्रिकादु
त्तरस्यानुस्वारस्य संयोगे परभूते मात्रिकत्वेन सह द्वित्वस्यानेन विधानात् ह्रस्वपूर्व
त्वेनानुस्वारद्वित्वमात्रविशेषणीयमित्यलं ॥ ह्रस्वपूर्वौ ङणौ द्वित्वमापद्येते पदांतगौ
॥ अपि स्वरोत्तरावेव श्लिष्टे भवति नान्यथा ॥ ८ ॥ ह्रस्वपूर्वौ याभ्यां तौ पदांतगौ पदांते वर्त
मानौ स्वरोत्तरौ याभ्यां तौ अपिशब्दाच्छंदनोत्तरावपि ङकारणकारौ द्वित्वमा
पद्येते ॥ श्लिष्टे संहितायां भवत्येव स्यामेवायमर्थः ॥ यदि ङकारणकारयोः पूर्वप
रनिमित्तयोः संहिता भवेत् ॥ तदेव तयोर्द्वित्वसद्भाव इति नान्यदा विभागे तु न स्याद्द्वित्व
मित्यर्थः ॥ यथा ॥ अरमन्नूर्जं ॥ न्यद्रः ॥ ग्निः ॥ ह्रस्वपूर्वादिति किं ॥ देवमनुष्यानेव ॥ प्राङ्
क्रम्प ॥ पदांतगाविति किं ॥ तनुवो पंक्तयो ॥ अपिशब्देन किं ॥ तन्न ॥ अन्वज्ञाति र्यङ् ॥ श्लि
ष्ट एवेति किं ॥ न्यङ् ॥ अग्निः ॥ पदविभागे मा भूत् ॥ ॥ इति लंबिभट्टविरचिते सर्वसं

मतान्तरीक्षादिदरेऽर्द्वित्वप्रकरणं॥ ॥यत्रयेननिमित्तेनद्वित्वंव्यंजनमश्नुते॥द्वितीय
स्यचतुर्थस्यतेनपूर्वागमोभवेत्॥७॥यत्रपदादौपदमध्येवायत्रयस्मिन्परभूतेस
तीतिव्याख्येयं॥येनस्वरपूर्वत्वेनस्वरोत्तररेफपूर्वत्वेनवालकारपूर्वत्वेनवानिमित्तेन
व्यंजनंद्वित्वमश्नुतेप्राप्नुयात्॥तेननिमित्तेनद्वितीयचतुर्थपरभूतेसतियथायुक्तं
सपूर्वागमः॥आगमनमागमःसंनिधिपूर्वयोरागमःपूर्वागमः द्वितीयेप्रथमागमः॥
चतुर्थेतृतीयस्येतिविवेकः॥यथा॥संवत्सरमुख्यं॥अभ्यस्थात्॥मूकट्टनरं॥अर्द्धमा
सेद्देवाः॥प्रगल्भोऽस्य। अपगल्भोजायते॥यत्रेतिकिं॥इतिभवति॥तेनेतिकिं॥वषट्
स्वाहाप्रथपारेमाभूत्॥द्वितीयचतुर्थस्येतिकिं॥षष्ठ्याःपरसप्तमीसमानार्थताविज्ञेया॥अन्यथादृष्टालिंगाभावात्षष्ठीस्थानेयोगेतिन्यायेनस्थानेयोगार्थताप्रसक्त
स्यादक्षिताप्रसज्येतेति॥परमात्याति भूतेवहुपसर्गाश्वधानच॥पाथएषचपूर्वेषु
पूर्वेछविभुजादयुः॥८॥परम॥आति।आत्ति॥भूते॥एतेषुपूर्वेषु।छ।रि।भुज।एते ४

परस्ताः पूर्वंयथाईस्त्रथमंद्वितीयंचेवंत्राप्नुयुः॥तथा तप स्वर्गाः। आप्नावोपा भ्य
धिप्रातिपरि त्विनी स्नूक्काः॥तथा धाम। पाथ एपइत्येतेषु पूर्वेषु विधिभक्तेतु॥यथा।
परम छंदः॥अति छंदसं। आतिछंदसाय। यदूते छ्छंदा। आ छ्विवदतेचप्र छिवदते
च। परि भुजः। ओतिकिं। विभुचमे। धाम छ्छेदिव। अप्येतिपाथः। एषच्छागः। पाथइ
तिकिं॥ऋतुभिर्वा एषछंदोभिः॥एतेषुसर्वेष्विति किं। सच्छंदस्याच॥कुत्रचित्स्वरयोर्म
ध्येवर्त्तमानस्य द्वितीयस्यचतुर्थस्य व्यंजनस्य लक्ष्यमनुसरतीति लक्ष्यानुसारो वै
दिकसंप्रदायो व्याकरणं वा ततो ज्ञेयं। तथा तेन प्रकारेण लक्ष्यानुसारत एव तत्र स्व
रयोर्मध्ये एवं द्वितीयस्य चतुर्थस्य ह्वर्वागमो विश्लेषो वर्णक्रमविचक्षणैः निपुणैः॥
यथा॥ अन्नपतेन्नस्य॥ अछिलं देव॥ लक्ष्यैनुसारत इति किं॥ वैदिकसंप्रदायेकुस
माधिगम्यत्वात् तत्र द्वित्वादि सद्भावस्य तस्य च व्याकरणे भूत्वं तदप्रयायत्वेनोक्तं॥
यतः अदृक्षस एगृस्यस्माद्धातोः कर्मणि क्तप्रत्ययं स्वरपाक्षामिति गत्वे कृते न

९ कारद्वित्वलाभः॥ यतश्चतस्मादेवधातोर्ह्रधिरिति मध्यमपुरुषस्यहेर्द्धिःकृते सति
पूर्वागमलाभः॥ आगमाभिधानं तत्र गौणं विज्ञेयं॥ गुणश्चासौ द्वरश्चेति॥ इत्यल
मूलत्तुमंत्रि हरिरचिते सर्वसंमतशिक्षाविवरणे पूर्वागमप्रकरणं॥ अघोषादू
ष्मणोऽघूर्ध्वस्पर्शमात्रे समास्थिते॥ सहकृतस्पर्शमारभ्य नस्तन्मध्ये प्रथमाग
मः॥१॥ अघोषात् ह्रकारव्यतिरिक्ताद् ऊष्मणोऽघूर्ध्वे परत्रस्पर्शमात्रे यस्मिन्क
स्मिंश्चिद् स्पर्शे समास्थिते सति तयो रघोषोष्मस्पर्शयोर्मध्ये परभूतस्पर्शस्य
समानं स्थानं यस्य सः प्रथमागमो भवेत्॥ सहकृदिति आगमोष्मणोऽपि पुनर्नभ
वतीत्यर्थः॥ मध्या॥ यः कामयेत॥ कामश्चमे॥ निष्ट्यामि॥ वातयः पवते॥ यः
प्मानः॥ अघोषादिति किं॥ अहं॥ ऊष्मण इति किं॥ आ कारः॥ स्पर्शमात्र इति ५
किं॥ श्वात्रास्थ॥ अघोषे· ह्यासे॥ उत्तमपरान्तुपूर्वक्षायणस्यैतत् विसर्गेणास्ती
त्यर्थः॥ पदांतस्यापदांतस्य सषयोः परभूतयोः॥ प्रथमस्यद्वितीयत्वमपदांतस्यरेः॥

त्तरे ॥१०॥ सषयोः सकारषकारयोः परभूतयोः सतोः पदांतस्यापदांतस्य वा प्रथमस्य
द्वितीयत्वं भवेत्। ञोत्तरेनुनाकारे पराभूते अपदांतस्यैव प्रथमस्य द्वितीयत्वं निवेदि
तव्यं। यथा। तप्सु विजुन्तष्ठोद्रत्री। इदमराष्ठ्रमिति। वक्षिपक्षिन्च। विसपोविरभिान्र।
प्रथमस्येति किं। त्री॰स्तस्त्वानुनु। ञोत्तरः अपदांतस्येति किं। तत्सयोः। सषयोरिति किं
। तंते। प्रासं यत्र निवर्त्तेत द्वित्वं तदधुनोच्यते ॥ यत्र यस्मिन्व्यंजनानीत्यर्थः ॥ अधुना
वसरप्रासावुच्यते निरूप्यत इत्यर्थः द्वित्वग्रहणं स्वरागमस्याप्युपलक्षणं ॥ स्वरेभ्यः
प्रथमान्पूर्वरूष्मान्चेद विसर्गो ॥११ स्वरेभ्यः प्रथमाच्च पूर्वरूष्मा द्वित्वं नापद्यते तथा
विसर्गश्च द्वित्वं नापद्यते। रेफश्च द्वित्वं नापद्यते। यथा। यद्दत्रा पूर्णमासो। अस्मन्नू
र्जो। मनः क्षेमो। ऊर्क्। स्वरादिभ्य इति किं। दार्घ्यं। अनुत्तमात्सवर्गीयात्सवर्णो सूर्वतः
स्थितः। समानो वर्गः सवर्गः। तत्र भवः सवर्गीयः। उत्तमव्यतिरिक्तात्सवर्गीयात्पू
र्वतः पूर्वत्र स्थितस्तद्वर्गीयस्य स्पर्शः समानो वर्णस्तस्माच्च पूर्वतः स्थितस्तज्जातीयो

६

रयोर्द्वित्वं नापद्यते। यथा। तर्छयोः। संयत्ताः। अनुत्तमादिति किं। आङ्कारः। सवर्णी-
यादिति किं। नषट्ःस्वारः। ह्रस्वास्पर्शपरो लश्च वश्च स्पर्शपरस्तथा १३ हश्च रा श्च
स्पर्शश्च ते परे यस्मादसौ लश्च लकारश्च द्वित्वं नापद्यते। तथा स्पर्शःपरो यस्माद
सौ वश्च वकारश्च द्वित्वं नापद्यते। यथा। आदित्यामल्कां। सहस्रवल्शाः। कुल्यांजु
हेमिति। बिभ्रद्राच्चे। ह्रस्वास्पर्श। पर इति किं। कल्याणी। लकार इति किं। विरप्शिन्
रुक्मं। स्पर्शपरो वकार इति किं। कल्याणी। नव्युच्यं।। रुक्मं। नकारश्च पदांतस्थो
यश्च हान्पूर्वतःस्थितः। यश्च वश्च हश्च यच्च कवद्रावः।। तस्मात्पूर्वतःस्थितः प
दांतस्थो नकारश्च द्वित्वं नापद्यते। यथा। जनान्यातयति। सर्वान्वै। एतान्होमान्
पदांतस्थ इति किं। नम्नि हन्मात्म नकार इति किं। एतद्ध। तस्मात्तदाकुः। उपसंहरति। ६
एवमूष्मादयो वर्णाः क्रमाद्द्वित्वविवर्जिताः।।१४।। एवमनेन प्रकारेण द्वित्वेन वि
वर्जिताः।। रहिताः। ऊष्मादयः। ऊष्मा विसर्जनीयादयः। सर्वे उक्ताः। ननु नाकार इ

त्यर्थः। ननूक्ता एवेति नोपद्यंते। यतः। ऊष्मा घोषो हारीतस्य। रेफपरश्च हकारः।
स्पर्शश्च तवर्गपरः। लतवर्गे यवकारपराविति द्वित्ववर्जितं न प्रातिशाख्ये निरूपि
ता नाम घोषोष्मादीनामनुक्तिरिति नामात्रांकामनुपदमाह॥ ऋषिभिर्बहुधा प्रो
क्तं वेदविद्भिस्तथापि हि॥ अध्येतृभिः समस्तैस्तु यद्गृहीतं तदीरितं॥१५॥ यद्यपि ऋ
षिभिः हारीतादिभिः नानाशाखोपयोगित्वेन बहुधा द्वित्वरहितं प्रोक्तं तथापि वेद
विद्भिः तैत्तिरीयशाखासंप्रदायविद्भिः यद्गृहीतं यन्मतं स्वीकृतं तन्मया निरूपितमि
त्यर्थः। ङकारादपदांताद्धि तधयोः परभूतयोः यथाक्रमं ककारगौ स्यातामागमावितिनि
र्णयः॥१५॥ अपदांतात् ङकारात् तधयोः परभूतयोः सतोः क्रमं ककारगकारावागमौ
स्यातामिति निर्णयः। द्वित्वादिनिर्णयः समाप्त इत्यर्थः। उदाहरणं नितु। युङ्क्ते युंजा
नेषु। युङ्ग्ध्वमिति राणु। तधयोरिति किं। अंकौ न्यंकौ॥ अपदांतादिति किं। प्रत्यङ्त्व
ह। ङकारादिति किं। तत्सवितुः। आदित्वं। इत्यालम्भुचुमंचिभटविरचिते सर्वसंमतशि

क्षा विवरणे आगमप्रकरणं। स्पर्शानां यवलानां च मकारः पूर्वस्थितः। तेषामेवानुया
श्लिष्टे सवर्णमनुनासिकं॥१६॥ स्पर्शानां पूर्वतस्थितो यो मकारस्तथा यवलानां च यो म
कारः पूर्वतास्थितः स तेषां परभूतानां सवर्णमनुनासिकं भजते। तथा तेः संश्लिष्टे
संहितायां सत्यामित्यर्थः॥ यथा। यं कामयेत। त्वं च मे। अभिषस्मः। तं ते दुश्चक्षाः
। तं प्रजापतिः। संयत्तः। संवत्सरः। तं लोकं पृणया। स्पर्शादीनामिति किं॥ संस्रवाणः।
यं नव मेतु। मकार इति किं। धन्वा। यद्यपस्याः। पूर्वतस्थित इति किं। रुक्मा संहिता
यामिति किं। यं कामयेत। पदविभागो मा भूत्। समानो वर्णः सवर्णः तुल्यस्थानकर
णः। तं। ङःत्को भवेट्नात्त्सःसषयोः परभूतयोः) यथाक्रमं कृतौ स्यातामागमावि
ति निर्णयः॥१७॥ ङात् ङकारात् उत्तरतः को भवेत् ककारागमो भवेत्। सषयोः स ७
कारषकारयोः परभूतयोः सतोः। टनात् टकारनकाराभ्यां तु तः तकारागमो भवेत्।

तयोरेव परभूतयोः सतोः। यथा। प्रत्यङ् कषड्ढ्हः। सदङ् कु समानेस्यात्। वषट्
स्वाहा॥ तान्त्सुध्यान्। तस्मिन्त्सहस्रशाखे। अन्वयाजौषट् ध्वड्नूयाजावनूया
जौषट्। ङ् इति किं। तान्त्सुध्यान्। न इति प्रत्यङ् षड्ढः इति किं। सदङ् कु समानैः। स
षयो इति किं। प्रत्यङ् स्वाहः। वषट् ते। तन्मे। ऋ पूर्वस्य नकारस्य भकारस्तैत्तिरीयके
। चरणे ऋकारपूर्वस्य नकारस्य जकारादेशो भवति। यथा। प्रैश्नाति। प्राश्नीयात्। ऋ
पूर्वस्येति किं। जान्त्सुध्यान्। ऋकारः पूर्वो यस्मात् असौ ऋपूर्वः। नकारपूर्वस्येति
किं। अस्मनूर्जा। तैत्तिरीय इति किं। अन्नमश्नीतमज्मीत तकारः ऋानयोर्मध्ये का
ठके परिकीर्त्यते॥१८॥ काठके चरणे ऋानयोर्मध्ये तकारागमः परिकीर्त्यते। तत्संप्र
दायविद्भिरितिशेषः। यथा। अन्नमश्नीतमज्मीत। सकलं भद्रमश्नुते। प्रश्नान्शो च्च।
प्रथमाः रात्रिमाश्नादिति। अश्नुते तं कामं। तकार इति किं। प्राश्नाति। अनूष्मप्रकृतेः
स्पर्शादुत्तमे नुत्तमान्यमानां दर्शयं स्यानुपूर्व्येण वर्णक्रमविचक्षणाः॥१९॥ ऊष्म

८ प्रकृतिस्थानीयस्य सा ऊष्मप्रकृतिः। तद्व्यतिरिक्ता नूष्मप्रकृतिः। अनुत्तमादुत्तम
व्यतिरिक्ताच्च स्पर्शादुत्तमे परभूते वर्णक्रमविचक्षणाः वैदिकानुपूर्व्येण स्पर्श
क्रमेण यमान् यमसंज्ञकान् नासिक्यान् वर्णयंति। प्रथमस्पर्शात् प्रथमः॥ द्विती
यात् तृतीयात् चतुर्थात् इत्यानुपूर्व्येण विज्ञेयं। यथा। रुक्मं। तिमध्नानः। तिग्मा
युधाः। व ध्नाति। अग्भनान्। अनूष्मप्रकृतेरिति किं। प ~ क्ष्म श्रूलः। अनुत्तमादि
ति किं। तन्मे श्मलणं। उत्तम इति किं। तष्किर एवं। इदानीं ह्रस्वादिन्यासभेदोच्चारण
सिद्धये॥ अनुक्तानामुदात्तादिधर्माणां सिद्धयेऽपि च॥ २०॥ वर्णसंधिप्रयुक्तस्यार्द्ध
मात्रादिविरामस्यांगांगिनां निर्वर्त्तयितुं व्यंजनानां स्वरांगित्वं निरूपयति एवमेवा
ह्वररुचिः स्वराणामेवोदात्तादयो धर्माः। व्यंजनानुतद्रुतमात्राद्यार्मत्वंत यास्व ८
रव्यंजनसंधेरर्द्धमात्राकालव्युदायनो चेत्तदार्ष्यजइति। व्यंजनं स्यात्परस्यांगं
पूर्वस्यावसितं भवेत्। व्यंजनं परस्वरांगं भवति। यथा। देवोदः। अवसितं पदान्त्यव

सानेवर्त्तमानंव्यंजनंपूर्वस्वरस्यांगंभवेत्॥ यथा। तत्सवितुः। परायुक्तमनुस्वारो
योगादिर्भक्तिरेवच। २१॥ परस्वरेणचासंयुक्तमसंबंधंव्यंजनंपूर्वस्वरस्यांगंभवेत्॥
यथा। अग्नीकेतुः। ऊर्द्ध्वमे। तथा। अनुस्वारः पूर्वांगंभवेत्। यथा। तथा योगादिः सं
योगादिभूतः। स्वरपूर्वादीनांविहितद्वित्वापेक्षया पूर्वभूतंव्यंजनं इति यावत्॥ अ
त्रांगशब्देन निरंतरत्वस्य विवक्षितत्वात् द्वित्वस्य च तथाविधत्वादेव व्यवधानेऽप्येत
दपि व्यंजनं पूर्वांगंभवति। यथा। कल्पांजुहोति। विभूदावन्ने। अर्केर्कः। पिपर्त्तुः।
मर्यश्रीः इत्यादि। परेणचासंयुतमित्यस्य प्रातिशाख्यसंयोगादित्येतदपवादत्वे
नोक्तत्वादूर्द्ध्वमन्नइत्यादेर्नात्रोदाहरणत्वभ्रांतिः कर्त्तव्या। भक्तिः स्वरभक्तिरपिपू
र्वांगंभवेत्। यथा। दर्शपूर्णमासौ। बार्हस्पत्यं। ननु संयोगादित्वेनैव तानुस्वार
भक्त्योरपि पूर्वांगत्वसिद्धेः व्यर्थः पुनरारंभ इति चेत्। न तयोरुक्ते वचनं संयोगत्री
त्वाधित्वनियमाभावात्। असवर्णं परस्यांगमंतस्थापरमक्षरं। अंतस्थापरेयस्य

तत्र अंतस्था परं सवर्णमंतस्थाया असवर्णपदमक्षरं तत्परस्वरांगं भवति। यथा।
युक्ष्वाहि देवहूतमान्। असवर्णमिति किं। संयत्ता आसन्। संवत्सरं। अंतस्था पर
मिति किं। ऋंचसे। परांगोऽभ परस्पर्शो। यमाश्चैवांगनिर्णयः॥ २४॥ परस्यांगं परांगं
सचासावूष्मा च स परो यस्मात्। असौ स्पर्शोऽपि परस्वरांगं भवेत्॥ यथा॥ तत्सवि
तुः। ऊष्मापर इति किं। इष्टेन। परांगेति किं। अक्ष्णयाभ्याधारयति। यमानासि
क्याश्च परस्यांगं भवेयुः। यथा। अग्नये। रुक्मे। अक्ष्णया। अंगनिर्णयः। कृत
इति शेषः। स्वरोत्तरोऽभूष्माणः पूर्वरेफस्य स्वरभक्तिता। स्वरोत्तरो यस्मात् स स्वरोत्तरः।
सचासावूष्मा च। तस्मात्पूर्वतः स्थितस्य रेफस्य स्वरभक्तिता। स्वरभागत्वं स्वरव्य
जनात्मकं वर्णत्वमिति यावत्। यथा। बार्हस्पत्यं। दर्शपूर्णमासौ। ऊष्माणः पूर्व १
इति किं। अर्केऽर्कः। तस्य स्वरोत्तरेण किं। दार्श्यं रेफस्येति किं। भामश्व। ऋकारस्य
स्वरूपं तु ध्वाबोद्धुं हि नाख्यते॥ २५॥ स्वरभक्तिरतो विद्याद्धकार मिहविस्तरम्। हिय

स्मात्कारणात्स्वरभक्तिॠकारस्य तद्वक्ष्यमाणं स्वरूपं तु ध्वाज्ञात्वाबोद्धुं ज्ञातुं श्र
क्यते। अतः ॠकारविस्तारादि विद्यात् जानीयात्। ॠकारस्य स्वरूपं हि श्लिष्टपा
दचतुष्टयं॥२४॥पादानां चतुष्टयं यस्मिन् तत् ॠकारस्वरूपं पादचतुष्टयं त्रासि
द्धमित्यर्थः। पादेषु तेषु विज्ञेयावाद्यावंते स्वरात्मकौ॥ अणू रेफस्य मध्ये च विज्ञेयो
व्यंजनात्मकौ॥२५॥तेषु च तत्सु पादेषु यो आद्यावंते च पादौ नौ स्वरात्मकौ॥ स्वररू
पौ आ स्वरणजात्यादियुक्तौ विज्ञेयौ॥ मध्ये द्वाव णु रेफसंबंधिनौ व्यंजनात्मकौ वि
ज्ञेयौ। रेफस्य चादिभूतं हि पादं पूर्वेण योजयेत्।स्वरात्मकेन पादेनोत्तरेणोत्तरं
रेफस्यादिभूतं आदित्वं प्राप्तं स्वरात्मकेन पूर्वेण पादेन योजयेत्॥ ॠकारस्य स
मानस्थानकरणपूर्व[illegible]रेफसमानस्थानकरणोत्तरभागं वर्णांतरं कल्पयेदि
त्यर्थः॥तस्मात्तेनैव प्रकारेणोत्तरेण स्वरात्मकेन पादेन उत्तरं रेफस्य पादं योजयेत्॥
एवंविधस्थानकरणं वर्णांतरं संपादयेदित्यर्थः। स्वरपादान्वितौ भागौ स्वरभक्ति

रितौ रितौ ॥२६॥ स्वरपादाभ्यां पूर्वोत्तराभ्यां अन्वितौ रेफभागौ स्वरभक्ति रितौ रितौ । सि
द्ध इति शेषः । अनेन क्रमेण ऋकाररेफसमानस्थानकरणं रेफऋकारसमानस्थान
करणं स्वरभक्तिसंज्ञकवर्णद्वयमुपपादितं भवति । एवं विवेकस्य विनियोगमाह ॥
हकारे पूर्वभागं स्यादुत्तरं त्वोषसेषु च । हकारे परतः पूर्वभागे रेफस्य स्यात् रेफांतर
स्वरभक्तिर्भवेदित्यर्थः । शषसेषु परभूतेषु उत्तरो रेफस्य भागः स्यात् रेफा
दिस्वरभक्तिर्भवेदित्यर्थः । हकारे संवृतां विद्याद्विवृतामितरत्र तु ॥२७॥ हकारे परतः
या स्वरभक्तिः तां संवृतां संवृतकरणां विद्यात् । इतरत्र शषसेषु विवृतां विवृतकरणां
जानीयात् । यद्यपि ऋटुरषाणां मूर्द्धा विवृतमूष्मणां स्वराणां चेति ऋकाररेफयोः
स्थानकरणप्रयत्नभेदाभावे किं । पूर्वोत्तरभावयोगे रेफस्वरात्मकत्वं कथमनेन उच्य १०
ते । नादोनुप्रदानः स्वरघोषवत्सु । अघोषेषु श्वासः इति हकाररेफयोरुपादानत्तो
विज्ञात । मानभेदाच्च हकारस्य जिह्वाग्रं करणं रेफस्य तु जिह्वामध्यमिति भागविवेक

स्य प्रयोजनमस्तीति। पूर्वस्वरस्य चाल्पत्वमित्वमुत्वमिति त्रयं। एतत्त्रयं विसर्ज्यैव
स्वरभक्तिं समुच्चरेत्॥२५॥ स्वरभक्तेर्यः पूर्वस्वरः तस्याल्पत्वं नाम ह्रस्वस्य चेत्पादो
नमात्राकालत्वं दीर्घस्य चेदध्यर्द्धमात्राकालत्वं रवं ह्रस्वमिकारत्वं उत्वमुकारत्वमिति
तत्त्रयं विसर्ज्य पूर्वस्वरे अकृत्वा स्वरभक्तिं समुच्चरेत्। उदाहरणानि। बार्हस्पत्यं।
दर्शपूर्णमासौ। वर्षाङ्गं। वर्सी। स्वर। भक्तिः परा स्वारात्प्रचयत्वमवाप्नुयात्॥ स्व
रात् स्वरितात्परा उत्तरा स्वरभक्तिः प्रचयत्वमवाप्नुयात्। यथा॥ यद्दर्शपूर्णमासौ।
स्वरादिति किं। दर्शपूर्णमासौ। स्वारो दीर्घे तु नात्याया स्वतंत्रा धूर्षदं भवति॥२६॥ स्वा
रे स्वरिते पूर्वे स्वरिते दीर्घे या स्वरभक्तिः स्यात्सा तु प्रचयत्वं नाप्नुयादित्यर्थः किं नु
पूर्वागतस्वारितो भवेत्॥ यथा। धूर्षदं। अत्र पदे स्वरभक्तिः स्वतंत्रा पृथग्भूता भवे
त्॥ यथा दोषावस्तार्हविष्मती। धूर्षदं। अत्येति किं। कोर्हतीति स्वरे दीर्घ इति किं। अ
र्हिर्जरणिमतिसर्पतीत्यत्र च। कामा मन्युस्तथा पापं त्रिषु पूर्वेषु तत्वत॥ स्वरभक्ति

११ विजानीयादिकारेणैव संभवेत्॥ ३०॥ कामःशब्दे मन्युःशब्दे तथा तेनैव मकारेण पा
पंशब्दे एते पुत्रिषु पूर्वेषु तत्वतो यथार्थतः स्वरभक्तिं विजानीयात्। उत्तरपदइति रे
षः। न निकारस्य वधानेरेफस्याक्षसंयोगाभाव कथं स्वरभक्तित्व मित्यत आह। इ
कारेणेन संभवेत्॥ नात्र कचाय रूपेणाकार संभवइत्यर्थः। यथा। कामोकाषरिन्न
मोनमः। मन्युरकाषरिन्नमोनमः। पापमकार्षीं त्रिष्विति किं। दधिक्राव्णो अकारि
षं। पुपूपो त्रिषु पूर्वेषु शषहेषु परेषु च॥ रेफादुकारएव स्यात् स्वरभक्तिर्नविद्यते॥
॥३१॥ पुश्च रुश्च पोश्च तेषु त्रिषु यथासंभवं पूर्वेषु शश्च षश्च हश्च तेषु यथासंभवं प
रभूतेषु सत्सु यो कारस्तस्योकारस्य द्वयवाय रूपेण अतलक्ष्म संयोगाभावादपि
स्वरभक्तिर्नभवेदित्यर्थः। यथा। पुरुषेण। पूरुषः। पोरुत्रिष्टः। पुरुहूतः। अत्र पपूर्वे ११
स्यपि वेदितव्यं। यथा। परुषः उकारो कारोकारेः किं। अकारिषं चण पूर्वेरीरिषोरीरिषं
नपि। तारिषस्तारिषच्चेत्यस्यात्स्वरभक्तिर्नविद्यते॥ ३२॥ एणःशब्दे पूर्वमकारिषंस्यादन्यस्व

रक्तिर्न विद्यते। तथा। रीरिषः। रीरिषत्। तारिषः। तारिषत्। चेत्स्यात्। अत्रापि स्वर
भक्तिर्न विद्यत इति संबंधः। यथा। दधिक्राव्णो अकारिषं। ए॥ इर्वह इति किं। पाप
मकार्ष। ॠ। रीरिषः। रीरिषन्मोत वीरान्। आयूंषि तारिषः। प्र॥ आयूंषि तारिष
त्। हस्वोत्तरं लकारश्च प्राप्नुयात्स्वरभक्तितां॥ हकारश्चाकारादुत्तरो यस्मादसौ। ८
लकारश्च स्वरभक्तितां प्राप्नुयात्। तच्च स्वरभक्तित्वमकारवत्। लकारपादश्च बुद्ध
यकल्पनया वगंतव्यं। यथा। शतवल्शा विरोह सहस्रवल्शाः। आदित्यां मल्हां।
हस्वोत्तर इति किं। कल्पांजुहोति। करेणुः करिणी चैव हरिणी हारितेति च। हंसपदे
ति विज्ञेयाः पंचैताः स्वरभक्तयः॥ ३३॥ एता निरूपिता रेफलकाररूपाद्वयर्थः॥ ता
एवं विभजंते। करेणुर्हस्मायेंगिकुर्विणी लहकारयोः। हरिणी रश्शासानां च हारिता
लश्चाकारयोः॥ ३४॥ या तु हंसपदा नाम सा तु रेफषकारयोः। एवं पंचविधां भक्तिमुक्त्व
रेत्स्वर्गकामुकः॥ ३५॥ ननु संज्ञाकरणस्य कुत्रोपयोग उच्यते॥ वासः शब्दादनुस्वारः

पूर्वस्यांगं न काठके ॥ काठकास्य चरणे वासः शब्दादुत्तरोनुस्वारः पूर्वस्वरांगं न भव
ति। यथा। कनकाभान्निवासाꣳसि। विश्वरूपाणि वासाꣳसि। अतिताम्राणि वासाꣳ
सि॥ वासःशब्दादिति किं। तुष्टुवाꣳसः। काठक इति किं। वासाꣳसि ममगावश्च। अ
नुस्वार इति किं। वासो हिरण्यमुतान ह्यूष्मप्रकृतिस्पर्शः पूर्वांगत्वमवाप्नुयात् ॥
२५॥ ऊष्मा प्रकृतिर्यस्यासौ स्पर्शः पूर्वस्वरांगत्वं नाप्नुयात् ॥ यथा। यच्छ्ररा
सात्। ऊष्मप्रकृतिरिति किं। इषेत्वा। स्पर्श पर इति किं। रुद्रस्य। अत्र सकारत्वम्
ष्मप्रकृतिः ॥ ॥ इत्यालमूरुचुमंचिभट्टविरचिते सर्वसंमतशिक्षाविवरणे अंग
प्रकरणं। उदात्तादिस्वराधारवर्णानामिह संस्थितौ। सोच्यते स्वरसंस्थानमज्ञानां श्रीः
ज्ञानसिद्धये॥ २७॥ इह संस्थितावितिद्वित्वपूर्वांगमादिप्रकरणे समाप्ते सति अज्ञा १२
नां तद्विषयज्ञानरहितानां तान्प्रतीत्यर्थः। उदात्तादिस्वराधारवर्णानां उदात्त आ
दिर्येषां उदात्तानुदात्तस्वरितप्रचयानां तेन्चे ते स्वरास्तेषामाधारास्ते च ते वर्णा

श्रुतेषां ज्ञानसिद्ध्येतद्विषयज्ञानसिद्ध्ये स्वरसंस्थानं संस्थीयते अस्मिन्निति
संस्थानं स्वराणां संस्थानं उदात्तादिधर्मोत्पत्तिविनियोगप्रकरणं प्रोच्यते निर्दि
श्यते ॥ एतद्देहदीर्घत्वमंगानां रूक्षता च या ॥ ॥ कंठाकाशस्य कृशता निमित्ता
न्युच्चजन्मनि ॥ ८ ॥ अध्येतृदेहस्य यदेतद्दीर्घत्वं अंगानामवयवानां एषा रूक्ष
ता काठिन्यं कंठाकाशस्य कंठविवरस्य कृशता संवृतता च या एतान्युच्चजन्मनि
उदात्तस्योत्पत्तौ निमित्तानि कारणानि जानीयादित्यर्थः ॥ यथा ॥ सङ्धानः ह्रस्व
त्वं यच्च देहस्य त्वंगानां मृदुता च या ॥ कंठाकाशमहत्त्वं च नीचजन्मनि हेतवः ॥ ९ ॥
अध्येतृदेहस्य यत्र ह्रस्वत्वं स्वाभाविकपरिमाणादल्पत्वं अंगानां मृदुता शैथि
ल्यं कंठाकाशस्य महत्त्वं विवृतत्वं एतानि तु नीचस्य अनुदात्तस्य धर्मस्य ज
न्मनि हेतवः कारणानि ॥ यथा । रूषेत्वा । कारणं स्वरितोत्पत्तौ समाहारोऽनयोर्भवे
त् ॥ अनयोरुदात्तानुदात्तधर्मयोः समाहारः समावेशः स्वरितस्य स्वरितधर्मस्य उ

सतोकारणं भवेत्। यथा। क्वास्य। उदात्तश्रुतिरेवेति प्रचयस्य प्रसिद्धता॥४०॥
प्रचयस्य चतुर्थस्य स्वारस्यानुदात्तसमानश्रुतिरेवेति प्रसिद्धता॥ प्रसिद्ध इत्यर्थः॥
यथा॥ अग्नेदुध्रगह्व। प्रसिद्धश्च प्रातिशाख्यादौ प्रचय उदात्तश्रुतिरित्यादौ॥
उच्चात्परोनुदात्तोयः स्वरितत्वमवाप्नुयात्॥ उच्चादुदात्तधर्मकात् स्वरात्परोनुदा
त्तोयः स्वरितत्वमवाप्नुयात्। यथा। यस्याक्षद्र। उच्चादितिकिं। ययोः। अनुदात्त इ
तिकिं। द्ववाव। तैराव्यंजनसंज्ञोयमुच्चपूर्वः प्रकीर्त्तितः॥४१॥ उच्चपूर्व उदात्तपूर्वोयः
स्वरितस्तैरोव्यंजनसंज्ञको भवति। यथा॥ यंल। उच्चपूर्व इतिकिं। अथक्क॥ अय
मितिकिं। न्विनुयाघोस्य। अमुंचपादवृत्तं च वदेदल्पतरं बुधः॥ अमुं तैरोव्यंज
नं पादवृत्तं वक्ष्यमाणलक्षणं च बुधो विद्वानल्पतरं मंदतरं प्रयत्नेन वदेत् उच्चार १२
येत्। उक्तमेवोदाहरणं॥ तैरोव्यंजनस्य पादवृत्तस्य। अत उ मं। विवृत्यां पादयोर्यस्मि
पादवृत्तः प्रकीर्त्तितः॥४२॥ यस्तु पादयोर्विवृत्यां दृश्यते स पादवृत्तः। यथा। सद्या

नः। पादयोरिति द्विवचनमेकत्वस्याप्युपलक्षणं तेन प्रउग मित्युदाहरणं। पाद
योरिति किं। ऋग्मादि विरामेनाप्लुत्य विवृत्तामिति किं। सो १ यो पि। सप्रातिहतनो
मास्वार्यते यस्तु संहिते। प्रातिहतसंज्ञको यस्तु स्वरितस्यात्। यः संहिते संहिता
यां उदात्ते उत्पन्ने उदात्ते उदात्तनिमित्ती कृत्यस्वर्यते स्वरितो भवेत्। यथा। गवेष्वो
यपुरुषाय। एवास्या पुत्रायते। संहित इति किं। न संहित इति वा पित्रोष्ववमेव
व्याख्येयं। अन्यथा अपि चेन्नानापदस्थमुदात्तमथ चेत्संहिते न स्वर्यते स
प्रतिहतः। एतत्सूत्रं विरुध्येत। यस्तु तस्यायमर्थः। सप्रातिहतो वेदितव्यः। सं
हितायामुदात्ते चानुदात्त उदात्तं। उदात्तमुदात्तवतीस्या भ्यां उत्पन्ने नानुदात्ते च
त्स्वर्यते। तदुदात्तमपि नानापदस्थं चेत्स्वरितापेक्षया पदांतरस्थं चेत्। अथा भ
यपदस्थं चेदित्यर्थः। अतिक्रान्तस्तु चात न परः प्रातिहत इत्यर्थः श्लोकस्य मदुक्त
विशेषे स्वीक्रियमाणे संगच्छते नन्वमात्रे पि न स्वर्यते इत्ययमर्थः कल्पनीयः त

दानीं संज्ञाकरणस्यैवावैयर्थ्यात्। अथ परिसंख्यारूपेण पदकाले चेत्कथं यतिः त्वयमर्थः
तदानीं संहितायां निषेधप्रतीतेः सूत्रं निर्विषयमेव भवेदित्यलं॥ अत्यंतमार्दवं त
त्र कार्यं स्वरितेच्च सर्वे॥ ७३॥ अत्यंतमार्दवं मृदुप्रयत्नः कार्य इति। पादवृत्त इत्यो
स्मातो तैरोव्यंजनबाधके॥ पादवृत्तश्च तैरोव्यंजनश्च बाधकौ तस्य स्वरव्यतिरिक्त
विषयत्वबाधको भवेत्। इतः सर्वावृत्ताद्वाभ्यां संहितस्तस्य बाधकः॥ ७४॥ सर्वत्रा
वृत्ताद्वाभ्यां लक्ष्यमाणस्वरितस्तयोर्वर्त्तमान इत्यर्थः॥ सप्रातिहतो वेदितव्यः।
अत्र प्रातिहतशब्देन लक्षणालक्षितया तैरोव्यंजन उच्यते। यद्वा पूर्वसंहितोदा
त्तनिमित्तस्य स्वरितस्य प्रातिहतमुक्तं अत्र न प्राप्नोतीदं वचनमारभ्यते। तदुदाहर
णानि॥ सर्वाः। अवरुंधे॥ स्वरितादनुदात्ताश्च प्रचयत्वमवाप्नुयुः॥ यथा॥ ज्ञास्य। 
श्रेष्ठतमाय। आप्यायध्वमघ्नियाः। स्वरितादिति किं। कुसुरुबिंदः। अनुदात्ता इ
ति किं। कोस्य॥ स्वरितादात्तयोर्यत्र परत्र स्थितयोः सतोः॥ ७५॥ स्वरितो न भवेत्तत्र

अव्ययश्च निवर्त्तते। स्वरितोदात्तयोः परत्र स्थितयोः सतोः पूर्वोऽनुदात्तो यत्र वर्त्तते
तत्र तस्याऽपि प्राप्तावनुदात्तस्य स्वरितत्वं न भवति। स्वरितोदात्तस्य प्रचयत्वं च।
यथा। कस्याहवनीयः स्वरितोदात्तयोरिति किं। अग्नेदुग्रगृह्य किं ऽ त्रिलवन्या।
एदोभ्यां यत्र लुप्तश्चेदकारः स्वरितो यदि॥ ५६॥ स्वरान्तरविधिं वक्ष्ये पूर्ववर्णस्यावि
स्वरात्म यत्र एदोभ्यामेकारौकाराभ्यां कंठतरतोऽकारो यत्र लुप्यते तत्र तत्स्वरा लुप्यमा
नाकारस्वरादनुदात्तादुदात्तादातदुभयं निमीजीकृत्य पूर्ववर्णस्यैकारस्यौकार
स्य च स्वरान्तरविधिं प्रकृतस्वरादनुदात्तादुदात्ताद्वा स्वरादन्यस्य स्वरविधिं प्रका
रं तिस्वराद्वक्ष्ये इत्यवसरप्राप्तावित्यर्थः। लुप्ताकारोऽनुदात्तश्च पूर्वोऽपि स्वरितो भवेत्॥
५७॥ यदि लुप्यमानोऽकारोऽनुदात्तस्तदा पूर्वोऽपि स्वरितः स्यात्॥ यथा। तेऽब्रुवन्॥ सो
ऽब्रवीत्। लुप्त इति किं। ते अब्रुवन्। अनुदात्त इति किं। तेवर्त्ति पूर्वोदात्त इति किं। गवे
प्साय। एषा निनिहितोऽज्ञेयो वदेद्दक्षनरं बुधः॥ एषस्वरितो निनिहितो विज्ञेयः ए

नंच दृढतरं। स्वार्थे तरप् दृढतरमित्यर्थः। प्रातिशाख्ये निरूपितः। उदात्तश्चेदुदा
त्तं च परः पूर्वः स्वरितनीचकैः॥ ७८॥ यदि लुप्यमानोकार उदात्तो भवेत्॥ तदा पूर्वः स्वरि
तश्चानुदात्तश्च उदात्तादिकारं आपद्यते। गवेश्वाय। रूंधेव। उदात्तश्चेदिति किं। तेभ्युव
न्नः स्वरितनीचकाविति किं। अपाग्रेभिव्याहरति। इवर्णोकारयोः स्थाने यवलौ स उ
दात्तयोः। तस्मात्परं ह्यनीचं स्वरितं तस्य वै भवेत्॥ ७९॥ उदात्तयोरिवर्णोकारयोः
स्थाने यथाक्रमं यकारवकारयोः सतोः तस्माद्यकारवकाररूपाद्वर्णः परमनुदात्तं
स्वरितं भवेत्। अभ्यष्ठाम् आदित्स्व ध्रुवंति। उदात्तयोरिति किं। इत्येषा॥ नाम्ना तु
क्षैप्र एव स्यादमुं दृढतरं वदेत्॥ असौ स्वरितनाम्ना क्षैप्रः स्यात्। अमुं स्वरितं दृढ
तरं वदेत्। उकारादुच्चकान्नीच उकारश्चोत्तरे स्थिते॥ ८०॥ ऊकारः क्रियमाणोत्र
स्वरितः संधितो भवेत्। अभिक्लिष्टः व्यपदिष्टोयं वदेन्मदत्तोरेव बुधः॥ ८१॥ उच्चकादुदा
त्तधर्मकादुकारान्नीच उकारे परत्र स्थिते सति उभयोः स्थाने क्रियमाण ऊकारः स्वरितो

भवेत्।संधिसंहितायांस्वरितो दृढैः प्रश्लिष्टो व्यपदिष्टः एनंच मृदुतरं वदेत्।यथा
।स्त्रीयमिव।स्रुग्घृता।उच्चकादितिकिं।स्रुपस्था।नीचः परइतिकिं।सम्यवंस्वर्य
ते यत्रपदस्थं नीचपूर्वकं॥अपूर्ववासनित्यंस्यात्तंच दृढतरंवदेत्।यत्रस्थले एकप
दस्थंनीचपूर्वकं अनुदात्तपूर्वकं अपूर्ववासयवंयकारवकारंस्वर्यतेसनित्यंस्यात्॥
तंच दृढतरंवदेत्॥दृढप्रयत्नेनवदेत्॥५२॥आदौयथा।क्वास्य।मध्येयथा।वीर्या
णि।अंतेयथा।सधन्यः।नीचपूर्वकंइतिकिं।अवरुंधे।पदस्थमितिकिं।व्यवैते
नाद्धन्नः।सयवमितिकिं।सो।यो।म्यग्नियत।यदांतरोच्चपूर्वोपिनित्यएवनत्वा
न्यथा।उक्तलक्षणास्वरितः पदांतगतोदात्तपूर्वोपिनित्यंस्यात्॥यथा।यद्वविष्वं।
अन्यच्च।उक्तलक्षणपूर्वोपिःस्वर्यतेकुत्रचिद्यपि।अल्पवायुर्भवेत्सोपिपादव
त्इतीरितः॥५३॥यःस्वरउक्तैःसमस्वरितलक्षणैःरहितोपिकुत्रचिद्यपिअल्पस्था
नांतरोपयोगीत्यर्थः।इतिस्वर्यतेस्वरितधर्मकोदृश्यतेसोपिपादवत्इतीरितः।स

चाल्पप्रयत्नो भवेत् ॥ यथा ॥ अभीद्धामे त्रिया । तपसो ध्यजायत । नादानुस्वारयोः
पूर्वस्वरभाक्पुर्वी रविच्छितः ॥ न ह्याक्षेपस्वरे तत्र नादोनुस्वार एव सः ॥ ५७ ॥ ना
दस्य वक्ष्यमाणलक्षणस्यानुस्वारस्य च स्वरितभाक् स्वरितः धर्म किंश्चितः पूर्व
स्वरितो यो विद्यते स्वरितधर्मः नादे अनंतरभूते नादे एव कर्त्तव्यः तथा अनुस्वा
रस्थले अनुस्वार एव कर्त्तव्यः ॥ अनुस्वारप्रसादलब्धो धर्म स्वरपरित्यागेन तयो
रेव कथं संभविष्यतीत्यत आह ॥ न ह्याक्षेप इति तत्र स्वरे एवंविध आक्षेपो
न कर्त्तव्यः । एवंविधव्यवहारस्य लोकवेदयोः संभावादिति । विरामपंचमानां तु ना
दसंज्ञा प्रकीर्त्तिता ॥ विरामोवसानमिति यथा । यो ऽ स्तुं । वीर्यी यत्रैको मध्यगो नी
चो विक्रमः स उदाहृतः ॥ ५५ ॥ यत्र पदाद्यो पदमध्ये वा मध्यगः उदात्तयोः स्वरित १६
योः उदात्तस्वरितयोः प्रचयोदात्तस्वरितयोर्वा स्वरितोदात्तयोरनुदात्तोदात्तयो
र्मध्यगो यो नुदात्तः स विक्रमसंज्ञो भवेत् ॥ स्वरितं विक्रमं चैव वदेद्दृष्टतरं बुधः ॥

पिक्रमानुदात्तंतत्समीपस्थंस्वरितंचद ७ प्रयत्नेनवदेत् ॥ यथा ॥ दो ७ वे । योस्मस्वे
ग्निः । तस्यच । श्रेष्ठतमायकर्मणे । सत्वेयजेतयोग्निष्टोमेन । गधन्वनागाः । देवभागं ।
अक्षणेन । वीर्याणि । इत्यादि । स्वरितेपरभूतेचस्वरितस्योत्तरार्धकं ॥ ५६ ॥ नीचं
कुर्यात्सकंपश्चयथादीर्घंतमुच्चरेत् । स्वरितेपरभूतेसतिपूर्वस्वरितस्योत्तरार्द्धकं ॥
अर्धमात्रंनीचमनुदात्ततरंकुर्यात् ॥ सकंपः कंपयुक्तः सन् अध्येतासकंप
मिति ॥ यत्नेतु ॥ कंपयुक्तंयथास्यात्तथातंनीचंकंपंवायथादीर्घधर्माक्रांतंदीर्घ
मनतिक्रम्यदीर्घकंपयस्यैतत् । ह्रस्वस्यतुयथाह्रस्वमितिव्याख्येयं ॥ ननुस
माहारस्वरितइत्यंतरेणाप्येतद्वचनमुत्तरभागस्यानुदात्तत्वसिद्धेः किम
नेनेतिचेत् । कंपविधानार्थमिदमिष्यतीतिचेत् । नतदानींनीचमित्युक्तत्वा
त् । सत्यं अतएवस्वरभागस्यानुदात्तत्वंसकंपंनिरूपयितुमिदंवचनमि
तिव्याख्येयं । तदुक्तं द्वियमएके द्वियमपरेताअणुमात्राइति । शिक्षायांतु ॥१

मध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत्॥ सरंगंकंपयेत्कंपंरथीवेतिनि
दर्शनमितिस्वरमध्येकंपोविहितः॥ तन्मतेतुसमाहारस्वरितइत्यनेनै
वोत्तरार्द्धस्यानुदात्तंसिद्धिरित्यलं॥ उदाहरणं॥ पितदेवत्या १ ॥ द्योतद्यं
निरवातासो १ पा १ न्यनियत॥ यथा दीर्घमितिह्रस्वकंपविषयंवातस्मि
न्द्देदीर्घसदृशमुच्चारादित्यर्थः॥ द्वयोरेकंभवेद्यत्रतत्रापिस्वरउच्य
ते॥ यत्रवेदभागद्वयोर्वर्णयोरेकंदीर्घंप्रवर्त्ततेतत्रापिसउदात्तादि
रूप्यतेनिरूप्यतइत्यर्थः॥ तयोरेकमुदात्तंचेदुच्चएवतयोर्भवेत्॥ ५८॥
तयोरेकीभूतयोरेकंपूर्वमुत्तरंचोभयंवाउदात्तंयदिभवेत्॥ तदातयोस्स्था
निकमेकमप्युदात्तमेवभवेत्॥ यथा॥ प्रार्पयतु॥ स्वरानुदात्तयोर्योगेस्वरितस्त १७
त्रवैभवेत्॥ स्वरितानुदात्तयोरेकादेशोस्वरितएवभवेत्॥ यथा॥ कन्येवतुला
पत्येचवजाया॥ एकोदात्तपदंत्रैयंउदात्तंदितयंपदं॥ ५९॥ अनुदात्तंचापदंविद्या

न्नित्यं द्वारमथापरं ॥ सर्वानुदात्तमथवा पदानां कुत्रचित्पदं ॥ ६० ॥ स समासे त्वनुदा
त्तस्यादेकोदात्तस्त्वनुदात्तयोः ॥ पदेष्वन्यद्वितं नीचमेवमेवपरस्थितिः ॥ ६१ ॥ एवं श्लि
ष्टैरभिहितः स्वरूपं वैदिकस्य तु ॥ निरूपितस्वरविभागस्य प्रयोजनमाह ॥ एकः
उदात्तो यस्मिन् तत्पदं ज्ञेयं उदात्तद्वितयमपि पदं परं अतिशायेन ज्ञेयमिति
संबंधः ॥ द्वौ उदात्तौ यत्रेति विग्रहः ॥ अनुदात्तं च पदं विद्यान्नीचस्वारस्वरितश्च
यस्मिन् ॥ तदपि वेदितव्यं ॥ अपरमन्यत् ॥ परमिति वाच्छेदः ॥ तत्र पूर्ववत्सर्वा
नुदात्तं च पदं विद्यात् ॥ चात्राब्दः कात्स्न्यार्थः ॥ पदानां मध्ये कुत्रचित् स्वारा
नुदात्तमपि पदं वेदितव्यमिति योजना ॥ ननु अनुदात्तं पदमेकवर्ज्जमिति
वक्ष्यमाणे कथं अनुदात्तपदं संभवदित्यात्राक्याह ॥ समाहार इति एकानुदा
त्तं यस्मिन् द्वावनुदात्तौ यस्मिन् तयोः समाहारः स अनुदात्तः स्यात् ॥ ननु पदे
षु उदात्तव्यतिरिक्ता वर्णा न स्वरेणोच्चारणीया इत्यत आह ॥ पदेष्वन्यद्वितं ॥

एषु यदेषु उरक्तस्वरं यदक्षरं तं नीचं विद्यात्॥ पदानां वैदिकानां स्थितिरेवमेव नान्यथा॥ एकोदात्तः। सोमः। द्युदात्तं॥ बृहस्पतिः। त्र्युदात्तं। इंद्राबृहस्पती॥ नीचस्वरितं। वीर्यं। सर्वानुदात्तं। अकामयत। प्रग्रहेष्वोपसर्गाणामितिशब्दः प्रयुज्यते। परस्तात्पदकाले यंत्र वोच्चारणमेव हि॥ ६२॥ प्रग्रहः। अथप्रग्रहाः। इत्युक्ताः॥ ईद्याः। समासशब्दाः। उपसर्गाः। प्रपरापसमन्ववनिदुर्व्याङ्‌ न्यधध्यत्यपिसुदभिप्रतिना सह लक्षयितव्याः। पर्युपयोरपि लक्षणे मात्र इत्युक्ताः विंशतिः। तेषां परस्तादितो पदकाले पदविभागसमये इति शब्दः प्रयोक्तव्यः। अन्यं चेति शब्दः सति संभवे पूर्वोच्चारण एव प्रयोक्तव्यः। तेन प्रग्रहेऽश्च विषयावेतत्॥ विशेषणं यथा। अथादर्यथा। प्रजापतिरिति प्रजापतिः। समिति। ते। वायुः। तेषामिति किं। इषेत्वा। परस्तादिति किं। आदौ मध्ये च माभूत्। पूर्वोच्चारण इति किं। द्वितीये माभूत्। नोपसर्गे विसानस्थो नीचः पूर्व १८

स्तथा द्वयोः। त्रिषु मध्ये स्थितश्चैव स्वचानोवग्रहस्तथा॥ ६३॥ तथावसानस्थेऽप्यु
पसर्गे न उक्त विधिर्भजते॥ यथा। गर्भ आ। तथा नीचानुदात्तोऽप्युपसर्गः नेति
परो भवति। यथा। अवदिवोवृष्टिं। द्वयोः पूर्व उपसर्गेऽप्युक्त विधिर्न भजते॥
यथा। आ प्रयच्छ। तथा त्रिषूपसर्गेषु मध्यस्थित उक्त विधिर्न भवति। यथा।
संप्रच्यवध्वमनु संप्रयात। अवोपसर्गे निदितिपरः। यथा। अवान्नो देव्या। अ
वग्रह उपसर्गोऽपि नेति परः। यथा। प्रजाः। अत्र विवक्षितानुपसर्गाननुदाह
रति। आपावान्वभिपर्युत्सुव्यतिन्यध्यप्युपप्रति। निः सं परोपसर्गाः स्युः स
मात्र द्वादश स्मृताः॥ ६४॥ प्र। आ। अप। अव। अनु। अभि। परि। उत्। सु। वि।
अति। नि। अधि। अपि। उप। प्रति। निः। सं। परा। एते एकोनविंशतिरुपसर्गाः॥
त्रिक्रमानुदाहरति। मास्थान्नः हि त्वना नाकं प्रियधा विशतेति च। भूलोहस्त्वमाव
क्षि भूला विश्यात्ति भूता वित्रा॥ धाता धत्त पूषा धत्त दक्षिणावर्त्तेति च। नोषूणस्त्व

र्यमायातिमा वृक्ष्णू षुणऊषुणः ॥ऊत्याप्राचीसादयति त्रियधा विशतोषुणः ॥
६६॥ कृत्वा हरति कृत्वा धत्त आलभते त्रिक्रमास्मृताः । दध्मातनक्ति चोदूहतारो
हन्तीति चतुर्विंशतिः ॥६७॥ सत्तेमारुह्यात् ॥ महित्वानानाकं तरुषुः । त्रियधा
विशतेत्याह । त्रियधा विशतारो अंतरिक्ष । मोषूणइंद्र । ऊर्ध्वऊषुणऊतय
इति । ऊर्ध्वऊषुणऊतये । ऋषुणः सदक्षासः । अर्यमायातिवृषभः । तदृषा
धत्तेतेन । सदक्षिणावर्त्ततस्मेदक्षिणं प्रत्यास्पत् । ऊत्याप्रयात । आचासादय ।
ति स्वया । त्वं धाता धत्त । भूत्वाहरत् । मादक्षिसुभूः । तस्मैतेमावृक्षीत्याह । भू
ता विशन्तिनेनं । एका मापरता विशः । कृत्वा हरति । कृत्वा धत्ते थो । वरोकृत्वा ल
भते । दध्मातनक्ति सेंद्रत्वया आसंदीमुदूहतारो हंति । एवं त्रिक्रमाश्चतुर्विं १९
शतिर्भवंति । एतानि त्रिक्रमाणामुदाहरणानि । लक्षणं तु । आकारांतमुदात्तां
तमाहुः परं यत्र दृश्यते । त्रिक्रमं तं विजानीयान्मोषूणऊषुणस्तथा ॥६८॥ आ

कार: अंते यस्य तथा उदात्तांतः उदात्तरूपाकारांतद् इति यावत्। तं आउ परं य
स्य तमेवंविधं पदं यत्र वाक्ये दृश्यते। तद्वाक्यं त्रिक्रमं विजानीयात्। तथा मो
षूणऊ षुण: इत्येते चेति। संहितावत्क्रमे सर्वं परं पदं वदुच्यते॥ क्रमे क्रम
ध्ययनेत्युक्ते प्रगृह्यपदं यदस्ति तदिति शब्दं मध्ये द्विः द्विवारं उच्चरेत्। यथा।
अथो ओषधीषु। अथो इत्यथो॥ अथावसानमीङ्ख्यं तु पदकालवदुच्यते॥ ७०॥
अवसानं विरामरूपं प्रगृह्यं तथैवेति मध्यं द्विरुच्यते। ईङ्ख्यं च यत्क्रमेत्युक्तं अ
वसानं द्विरुच्चरेत्॥ ईङ्ख्यं तु क्रमस्य क्रमवसानपदं वदेवोच्चरेत्॥ यथा॥
अनुसंचरंती। प्रजापतिरकामयत॥ प्रजापतिरिति प्रजाऽपतिः। अजरे
तासा। अजरे इत्यजरे। भूतिरेतसेति भूतिऽरेतसा। अंतस्थाभ्यः पवर्गाच्च स्व
रेभ्यः सर्वे आस्थितौ। त्रिष्टुप् छंदस्तथानुष्टुप् ककारांतौ वितीरितौ॥ ७१॥
स्वरेषु पवर्गे वा अंतस्थासु वा परतः। त्रिष्टुबनुष्टुप् छलोककारांतौ रिङ्ले

यो। यथा। त्रिष्टुगिंद्रियं। अनुष्टुगानुष्टुभः। अनुष्टुग्वाकू। त्रिष्टुग्यत्नू। अनुष्टु
स्यत्न्या। एते षिति किं। अनुष्टुप् छंदसां। त्रिष्टुज्जगती। एता विति किं। गायत्री
त्रिष्टुभे। जगत्यनुष्टुभे। अनुरत्र लुपकारांतौ व्यतिरिक्तौ विति निश्चितौ॥
अन्यत्र स्वरादिव्यतिरिक्ते तु वर्णे पकारांत॥ वेवत्रावेद्वे एतौ॥ उक्तं पदुदाहर
णं॥ प्राणानामिति च त्रैष्टुभापदयोः परभूतयोः॥ पूर्वस्य तु विधेरत्र वैपरीत्य
मिति स्थितिः॥ ७१॥ त्रिष्टुप् त्रैष्टुभी अनुष्टुप् प्राणानां॥ इत्यत्र पकारादि परत्वे
पि ककारांतत्वं तद्वैपरीत्यं पकारांतमित्यर्थः॥ चर्णद्वये विरामे वा स्वरयो
र्मध्य ओष्ठ्ययोः॥ पूर्ववर्णं प्रयत्नेन नवदेदुत्तरं बुधः॥ ७२॥ ओष्ठ्ययोः स्वर
योर्मध्ये वर्णद्वये व्यंजनद्वये विरामे विच्छेदे वा स्थितायां सर्वौष्ठ्यस्वरप्रय
त्नेन उत्तरमोष्ठ्यस्वरं न वदेत्॥ प्रयत्नांतरं तत्र कर्त्तव्यमित्यर्थः॥ यथा॥ उ
त्पूतस्तु षभं॥ अथो ओषधीषु। वर्णद्वय इति किं। कुसुरुबिंदः॥ ओष्ठ्ययोरिति २०

क्रिं। यत्ना। यद्यपि अत्र तकारवकारयोः प्रयत्नभेदोस्त्येव तथाप्यो ष्ठ्यभेदा
भिप्रायेण प्रयत्नभेदकथनान्न चोद्यावतरः। ओकारे परभूते च वकारे चाधा
रस्य च ॥ ओकारे परभूते च सर्वोष्ठ्यप्रयत्नेन वदेदुत्तरं वकारे तु परभूते अध
रस्य अधरोष्ठ्यस्य प्रयत्नांतरं कर्त्तव्यं। उत्तरोष्ठ्य सर्ववर्णे वदेदिति वेदितव्यं ॥
यथा। योनौ ॥ ध्रुवोसि। हकारमौरसंविद्यादंतस्थासु परासु च ॥ ७४ ॥ और
सं उरस्थानं हकारं अंतस्थासु परतः ॥ विजानीयात् ॥ यथा ॥ संनह्यति। जि
ह्वाग्रेण। उत्तमेषु परेष्वेव नासिक्यत्वमिहाधिकं ॥ उत्तमेषु पंचमेषु परतः ए
व और संविद्यादित्यर्थः। अयं विशेषः। इहोत्तमेषु नासिक्यत्वं अंतस्था
पराद्धकारादधिकं उत्तरस्थानासिक्यश्चेत्यर्थः। अह्न। गृह्णाति। ब्रह्मवा
दिनः। एतेष्विति किं। बृहस्पतिः। कंठलमत्र। नासाभ्यां नोत्सृजेद्वायुमत्यंतं
हमसंयोगे ॥ ७५ ॥ हकारमकारयोः संयोगे नासारंध्राभ्यां वायुं प्राणवायुं। अत्यं

तेनोत्कृष्टेन । किंत्वल्पमेव विनिष्क्रमयेदित्यर्थः । ब्रह्मवादिनः । न वदेद् दूरसात्यं
तमतरस्थाभिश्च संगमे । हकारस्योतरस्थाभिः । संगमे उरसा अत्यंतं न वदेत् ॥ लु
प्तो वर्णः पदांतस्थो नासिक्यो रंगसंज्ञकः ॥ ७५ ॥ पदांतस्थो नासिक्यो लुप्तो वर्णो
यः स रंगसंज्ञो भवति ॥ कांस्यध्वनिसमं रंगं हृदयादुत्थितं भवेत् ॥ तं च रंगं कां
स्यध्वनिना समं यथा भवति तथा हृदयादुत्थितं वदेत् ॥ चत्वारः काठके रंगा
दीर्घाश्चारण्यके विदुः ॥ ७७ ॥ काठके कठपरिग्रहचारणे चत्वारो दीर्घरंगाः ॥
पंच रंगप्लुता दीर्घाश्चत्वारस्तैत्तिरीयकसंहितायां क्षुद्रारण्यात्मके वेदे प्लु
तरंगाः पंच विज्ञेयाः ॥ दीर्घास्तु चत्वारः ॥ तान्विविच्योदाहरति ॥ श्लोका सुमं
गलाँ यह्वाँ उप हूताँ समाँ प्लुताः ॥ ७८ ॥ सुश्लोका ३ँ सुमंगला ३ँ ॥ यह्वा ३ उप हूता 27
३ परो मामा ३ँ । एते प्लुताः । विज्ञेया दीर्घस्तां इमिदेवाँ उस्ता अहं मम वां
अवाहा । तां ३ इमि । देवां २ उपास्त्वां २ अहं । मम वां ३ अवाहाः । एते दीर्घाः विज्ञे

याः। नित्या भवंति नासिक्या अनुस्वारोत्तमा यमाः॥ ७९॥ अनुस्वारश्च उत्त
माश्च यमाश्च नित्या नासिक्या नासिकस्वभावा भवंतीत्यर्थः। अंतस्थाश्च हका
रश्च स्वराश्चैव निमित्ततः॥ अंतस्थादयस्तु निमित्ततः। नासिक्यवर्णसंबंध
वशान्नासिक्या भवंति। यथा। संयताः। संवत्सरं। त्रीं लोकान्। गृह्णाति। सुश्लो
कां॥ अत्र तु पदांतत्वं निमित्तं। स्वराणामूष्मणां चैव प्रयत्नो विवृतं॥ ८०॥ प्र
यतनं प्रयत्नः स्थानकरणसंबंधः। संवृतत्वमकारस्य विशेषोयं विधीयते॥
उत्कर्षं विवृतत्वमकारे संवृतत्वं प्रवदंति। चकारस्य ह्रस्वस्य रूपस्य। स्पर्शानां
स्पर्शतां विद्यात् अंतस्थानामीषदीरिताः॥ स्पर्शानां कादिमकारांतानां स्पृष्टतां वि
द्यात् जानीयात्। अंतस्थानामीषदीषत्स्पृष्टता ईरिताः। नेमिवत्स्पृष्टता ज्ञे
या चतुर्थेषु विचक्षणैः॥ ८१॥ विचक्षणैः वर्णोच्चारणकुशलैः चतुर्थेषु उपल
क्षणमेतत्॥ द्वितीयेष्वपीत्यर्थः नेमिवत् नेमिना रथचक्रेण तुल्यं वर्त्तत इति

नेमिवत्॥ अतिशायेनस्पष्टतेत्यर्थः। स्पर्शानांयत्रसंयोगः पाठेयदिभवेत्तदा। त
योरादेश्रुतिर्नास्तिविरामेव्यंजनस्यच॥ ४॥ पाठे अध्ययनकाले यत्रयत्र द्वयो
स्पर्शानांपरस्परंसंयोगो यदिभवेत्॥ उपलक्षणमेतत्। द्वयोर्वास्पर्शयोरि
तितदातयोस्तेषांचादेरादिस्पर्शस्यप्रथमंस्पष्टतायां श्रुतिर्नास्तितथाविरा
मेवसानेव्यंजनस्यश्रुतिर्नास्ति॥ यथा। पाक्। स्पर्शयोरितिकिं। संयताः॥
स्पर्शानामित्यस्यातमातुरित्यनुवृत्तत्वादुपलक्षणत्वात्तुः। पदांतेचोत्तरस्यादावेक
वर्गेवसानेग॥ पूर्ववर्णप्रयत्नेननदद्युत्तरंबुधः॥ ५॥ पूर्वपदस्यांतेउ
त्तरपदस्यचादौवर्णे एकोवर्गोयस्यतस्मिन्सतिपूर्वस्यवर्णप्रयत्नेनोत्तरप
दादिवर्णंनवदेत्॥ कदा अवसानगे पूर्वस्यवर्णे अवसानंचतेसतितन्मध्ये २२
ध्येयदिविच्छिन्नत्वंस्यादितियावत्॥ यथा। तत्। तो। रुक्। कामः। अनुष्टुभाणां।
अवसानगइतिकिं। तज्जयानां। तस्यापवादमाह॥ ओमः १ वर्गसंयोगस्ययत्ने

नेष्यते पृथक्। ओकारस्य त्ववसानस्य पवर्गेणोत्तरपदादिना संयोगे सहाध्य
यनेपृथक्प्रयत्नो नेष्यते। यथा ओमूर्णापश्चात्। ओमिति किं। अनुष्टुप्सा
णानां विरामो मात्रिकस्तत्र ततोऽन्यत्र द्विमात्रकः॥ ८३॥ तत्र ङ् पवर्गयोः विरामो
मात्रिकः। ततोऽन्यत्र तु पवर्गविरामे द्विमात्रिविरामो वेदितव्यः। संहितापदव
त्कार्ययुक्तं यत्र न संहिते॥ प्रकृतिः सा तु विज्ञेया ज्ञानादेव फलं लभेत्॥ ८४॥
या संहितापदवत् पदाध्ययनकालइव संहितसंहितायुक्तं च कार्यं यत्र
नास्ति सा प्रकृतिः। संहिता विज्ञेया तस्याज्ज्ञानादेव फलं न तु संज्ञा प्रयुक्तं कार्य
मित्यर्थः। यथा। स्वधा असि। समा असि। प्रबुध्निया इति। आदिवर्णं चतुर्थे
च सप्तमे दशमे तथा॥ द्वादशे षु स्वरेष्वेव मात्राकालः प्रकीर्त्तितः॥ ८४॥ वर्ण
समाम्नायक्रमेण प्रथमं चतुर्थादयो मात्राकाला वेदितव्याः॥ पंचमाष्टमयो
श्चैव द्वितीये कादशस्य च। एकारादि चतुर्णां च द्विमात्राकालइति॥ ८५॥ वर्ण

समाम्नायः क्रमेण पंचमाष्टमादयो वर्णा द्विमात्राः प्रकीर्त्तिताः ॥ नवमस्य तृतीय
स्य षष्ठस्य प्लुतता भवेत् । वर्णसमाम्नायेन नवमस्य तृतीयषष्ठयोः प्लुतता त्रि
मात्रत्वमित्यर्थः ॥ एतदुपलक्षणं आरण्यके संध्यक्षरेष्वपि । त्रिमात्रत्वदर्श
नात् । यथा । अहमन्नादो ३ असुन्नानान्युदाहरणानि । व्यंजनं त्वर्द्धमात्रं
स्यादवसाने समीर्यते ॥ ८६ ॥ स्पष्टं अधिकारमाह । त्रिपादत्वं लकारस्य पंच
मानां तु केवलात् । दीर्घात् प्लुताच्च कालो हि मात्रिकः परिकीर्त्तितः ॥ ८७ ॥ अवसा
ने वर्त्तमानो लकारः पादोनमात्रः स्यात् ॥ यथा । बाल् । अवसान इति किं । बा
लिति । पंचमानां लरसानवर्त्तिनां केवलाद्दीर्घात् प्लुताच्च परभूतानां मात्रिकः
कालो वेदितव्यः । यथा । ताङ्स्यादि । केवलादिति किं । पंचमानां द्विमात्रत्वं ह्रस्व
स्यापरितिष्ठतां ॥ ह्रस्वार्द्धमात्रत्वात् ॥ पंचमानां ह्रस्वस्यापरितिष्ठतां ह्रस्वस्यो २३
परितिष्ठतां ह्रस्वस्यापरिवर्त्तमानानां अवसानवर्त्तिनां द्विमात्रता । यथा । तंप्र

स्यऊ इत्यादि। विवृत्तौ पदयोर्मध्ये एकमात्रः प्रकीर्तितः। पदयोर्मध्ये या विवृत्तिः सा
एकमात्रा। यथा। अयो ओषधीषु। पदयोरिति किं। यथा। प्रउगं शिक्षायां तु। ह्र
स्वादिर्वत्सानुसृतिरं ते वत्सानुसारिणी। पाकवत्युभयोर्ह्रस्वादीर्घे स्यात् पिपीलि
का॥८९॥ संज्ञा पूर्वकं मात्रिका वत्सानुसृतिस्तथा वत्सानुसारिणी। पदे नास्या
साकवती पादमात्रा पिपीलिका॥९०॥ विवृत्तिः कालभेद उक्तः। ईङ्खपदविरामश्च
इतिशब्दपरे स्थिते। पदमध्ये विवृतत्वं भाष्यकारेण तस्य च॥९१॥ सामर्थ्याद्विहि
तः कालो मात्रार्द्धः प्रयं हेषु च। ईङ्ख शब्द इति शब्दपरतो यो विरामः तस्य पद
मध्यविवृत्तित्वं सामर्थ्यात् न्यायात् व्युत्पाद्य भाष्यकारेण मात्रार्द्धकालो निरू
पितः। यथा प्रयहेषु इति शब्दपरभूते अर्द्धमात्रा विरामत्वमित्यर्थः। यथा। प्र
जापतिरिति प्रजा। पतिः इतः। अथो इत्यथो भाष्यकारो यं न्यायमाह। प्रयं हे
ष्व प्रयुक्तत्वात् पदेकल मितेस्फुटं ९२ इतीरिति शब्दस्यात्र प्रयं हेष्व प्रयुक्तत्वान्नो

ष्यामेकपदत्वं स्फुटं व्यक्तं तत्राचारो पिप्रमाणमिति दर्शयति। कुर्वन्स्वाध्ययनं सर्वपदेक्यंपरिग्रहश्च। अयमेवाध्ययो रितिनासहपदैक्यंपरिग्रहेवाध्येतारो ध्ययनंकुर्वंति। एवमननंगीकारेदोषमाह। नोचेत्संख्यातिरिक्तत्वमृचीवपद वच्चरेत्॥ ९३॥ नोचेत्पदैक्यनास्तिचेदिति प्रयोगः। तदाअध्येतृभिःपरिग्र हीतायाःसंख्यायाअतिरिक्तत्वं आधिक्यंभवेत्। स्वीकृतानचपनसेषुपंचा शत्संख्यादृष्टापतिर्वा रचति। ऋचीवपदवच्चतघथा। संख्यातिरिक्तत्वमृ चियथावर्णोतिरिक्तत्वंपदेननिषिद्धतद्वदित्यर्थः। यथा। सप्तपदांते। स्र पेइतित्रीणि॥ अवसानेद्विमात्रत्वंपदानामितिनिश्चयः। पदानामवसानेद्वि मात्रंवेदितव्यं॥ यथा। इषे। त्वा॥ ऊर्जे। त्वा। इत्यादि। अनुस्वारस्यमात्रत्वंसंयो गेपरतस्थिते॥ ९४॥ अन्यत्राध्येतृभिःसर्वैःद्विमात्रत्वंप्रकीर्त्तितः। अन्यत्रसंयो गव्यतिरिक्तेपरत इत्यर्थः। यथा। संश्रवाह। अन्यत्रतंषउहानीत्यादे। २४

उक्तार्थं शिक्षासंमतिमाह। तथाचोक्तं। अनुस्वारो द्विमात्रस्याद्रेफोष्मसु प
रेषु च। संयोगे परभूते स्यान्मात्रिकस्तद्विरूपवत्॥ १५॥ ओष्ठ्ययोः स्वरयो
र्मध्ये संयोगादिर्यदि स्थितः। स विसर्गाक्षरपदादुभयत्रार्द्धमात्रकं॥ १६॥ अ
र्द्धमात्राकालविरामः कर्त्तव्यः। यथा। उत्तस्तुष्मा। अत्र तकारपकारयोर्म
ध्ये विरामः। मनः क्षेमे। संयोगादिरिति किं। कुसुरुविंदः। ओष्ठ्ययोः स्वरयोरि
ति किं। तत्त्वायामि। अत्रापि तकारपकारयोर्मध्ये अर्द्धमात्रत्वके पांचित्वसंम
तसंयोगादितेन नागत्वविधानस्य तदर्थत्वात्। क्षपरादितिकिं। यः कामये
ताद्दलमध्ये तु कालस्य मात्रार्द्धपरिकीर्त्तितं। इकारलकारयोर्मध्ये तु का
लस्य या मात्रार्द्ध अर्द्धमात्रमित्यर्थः। यथा द्दलाद्भवति। अर्द्धमात्राभवे
द्भक्तिवाक्यातेष्यर्द्धमात्रकं। स्वरभक्तिरर्द्धमात्रता भवेत्स्वरव्यंजनात्मक
त्वादेतद्विधानं वाक्यस्यांते अवसाने अधिकमर्द्धं यस्याः सा अध्यर्द्धः तस्य

भावस्त्व द्राव:। यथा। समुद्रामुपस्थे। वाक्यातद्धति किं। मदावसाने द्विमात्र
त्वादिति। अवग्रहावसाने तु मात्राकाल प्रकीर्त्तित:। अवग्रह: ईद्धयसर्व
भाग:। तदवसाने यथा। प्रजापतिरिति प्रजा। पति:। इत्यादि। ऋत्कार्द्ध
योस्त्रिमात्रत्वमवसाने प्रकीर्त्यते॥१८॥ ऋत्क अर्द्धश्लुतयोरवसाने त्रि
मात्रता ज्ञेया। यथा। अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं। होतार
रत्नधातमं ३॥ इत्यादि। अवसानइति किम ध्येमाफलु। नासिक्याव्य
क्तिमध्यस्था: सपादो मात्रिको भवेत्॥ यत्र व्यक्तिमध्यस्थोनासिक्यो ध्वं
निवर्त्तते स सपाद: पादसहितो मात्रिको भवेत्। यथाय द्वा ॱ इत्यपतत्।
ताॱ इमि। ननु ध्वनिरिति कथं लभ्यते। व्यक्तिमध्यस्थ इत्युक्तत्वात्। तत्र
च वर्णे संभवादिति। व्यक्तेरन्याश्रुतकालोभवेदिति विनिर्णय:॥१९॥ २५
अन्याश्च व्यक्तेस्तत्काल: तस्य काल एव कालो भवेत्। सोयं व्यक्तिर्नासि

क्ष्वेन ध्वनिना पूर्णो वर्त्तत इति यावत् ॥ समाप्तावनुवाकस्य मात्राणां पंचकं
स्मृतं । अनुवाकस्यावसाने पंचमात्राः स्मृताः । यथा । पश्यन्ना हि इत्यादि । अ
ध्यायेऽष्टौ ति वित्रयं प्रश्ने कांडे यथाक्रमं ॥ १०० ॥ प्रश्नकांडावसानयोस्तु क्रमेण
अष्टौ द्वौ मात्रा [illegible]याः । यथा । कल्पयाति ८ । जनदस्मियाय १० ॥ तेत्राणां तु
समाप्तौ तु त्र्यहः कालः इष्यते । स्पष्टोऽर्थः । समुद्रो बंधुः ३ ॥ येभ्यश्चैनस्साकं ॥ ॐ
३ वेदस्यापक्रमे विद्वानवसानेप्यतंद्रितः ॥ १०१ ॥ उच्चरेत्प्रणवं ब्रह्मरक्षायै छं
दसां स्फुटं । वेदस्यापक्रमावसानयोः प्रणवरूपं ब्रह्म छंदसां गायत्र्यादीनां
रक्षायै अतंद्रितोऽप्रमत्तः । वैपरीत्ये दोषमाह । आदावनुक्ते स्रवति परस्ता
च्च विशीर्यति ॥ १०२ ॥ वेदस्यादौ प्रणवेऽनुक्ते वेदं च्यवति परस्तादवसानेऽनुक्ते
तु वेदः शीर्यति तस्मात्प्रयत्नेन प्रणवमुच्चारयेदित्यर्थः ॥ यजुः प्रणव उक्तः स्या
त् स्वरास्तु स्वरान्तराणि षट् ॥ यजुर्वेदे प्रणव उदात्तः कर्त्तव्यः । अंत इत्यनुवा

के तुप उ स्योंकाराः स्वराः स्वरिता भवेयुः॥ यथा। ॐ इषे त्वा। ॐ तच्छ होत्यादि॥
प्रारंभकश्च तु मात्रो वेदस्थस्यात्त दर्द्धकः॥ आरंभ उपक्रमस्तत्र प्रणवश्च तु मा
त्रो भवेत्। वेदस्थः वेदांतर्गतप्रणवस्तदर्द्धको द्विमात्र इत्यर्थः॥ यथा। ओं ४ इषे
त्वा। ॐ तच्छं सो इत्यादि। अध्ययनानुवाकांत्यः कर्मादौ च त्रिमात्रकः। अध्यय
नांत्यः अनुवाकांत्यः संध्यावंदनाद्यर्थः। क्रियमाणस्त्रिमात्रः। सर्वोद्यः। मध्ये उ
पक्रमे च क्रियमाणश्च। प्रारंभाद्याः क्रमान्नाद मात्रा णु च णुमात्रिकः। वेदार
भे तु यो नादो मकारो मात्रिको भवेत्॥१०४॥ वेदस्थस्य त्वोंकारस्य मकारश्चाणु
को भवेत्॥ नादो मकारो अणुको भवेत्॥ सपाद द्विमात्राः प्रणव इत्युक्तं भव
ति। वेदस्थस्य प्रणवस्य द्विमात्रत्वपक्षः कथं युज्यः इत्यत्रोपपत्तिमाह। अस्वरं
व्यंजनं युक्तं मणुमात्रं प्रयुज्यते। संसर्गाच्चेति वा कुल्यात् मात्रा बुद्धिः प्रकी २५
र्त्तिता॥१०५॥ अस्वरं स्वरासहितं व्यंजनं नित्यं सर्वदा अणुमात्रं नन्वणुमात्र इ

त्युक्तं। ह्रस्वार्द्धकालंव्यंजनमितिविद्यमानत्वादितिचेत्। सत्यंतदोत्तसएकं
मात्राबुद्धिस्तुव्यंजनेस्वरसंसर्गादितिबाहुल्यात्लाघुर्येणवर्द्धैः कीर्त्तिता॥
मात्रादितिकालानांलक्षणमाह। चाषोरौत्येकमात्रंहि द्विमात्रंत्वेववायसः।
त्रिमात्रंतुशिखीरौतिह्येतन्मात्रादिलक्षणं॥१०६॥ चाषोवन्यःकाकः।सएक
मात्रंरौतितस्यशब्दमेकमात्रकालविशेषमित्यर्थः। वायसोग्राम्यःकाकः॥
शिखामयूरः॥ क्रमेणद्विमात्रस्त्रिमात्रःकालानांलक्षणमिति॥ मात्रादिनि
र्णयोपयोगितिप्रवृत्तिंदर्शयितुमाह। विलंबितंद्रुतंमध्यंवाचस्तिस्रोहि
वृत्तयः। क्रमान्यत्वंप्रतिवृत्तौकालान्यत्वंभवेत्स्फुटं॥१०७॥ वाचोवाक्यस्यवृ
त्तयोव्यापाराः। तिस्रोभवंति। ततःकिमित्यत आह। क्रमान्यत्वंउच्चारणभेदः।
कालान्यत्वंकालभेदश्च। प्रतिवृत्तौस्फुटंप्रत्यक्षमित्यर्थः। उक्तःप्रयत्नोयोय
स्यसमःसर्वत्रतस्यसः। प्रयत्नसाम्यमेतद्धिवृत्तिसाम्यंतदुच्यते॥१०८॥ यो

यस्य वर्णस्य उक्तः प्रयत्नो यो येन समः स सवर्णः तेन समः हि यस्मात्कार
णादितत्प्रयत्नसाम्यं तु वृत्तिसाम्यं आतो वृत्तिसाम्यं तद्वा दि तत्प्रयत्न
साम्ये वृत्तिसाम्ये सति उच्यते॥ वृत्तिसाम्याभावे केवलप्रयत्नसाम्येन सव
र्णत्वं भवतीत्यर्थः॥ प्रथमान्तरपाठे तु प्रयत्नसाम्यं वृत्तिसाम्यमेवेत्यर्थः॥
वृत्तिसाम्यस्य साधर्म्यापि यो गित्वं संपादनेनोपपादयति। आश्रित्य मध्यमां
वृत्तिं कालानां निर्णयः कृतः। प्रातिशाख्यादिशास्त्रेषु यस्मात्सैव समाश्रि
ता॥१०९॥ यस्मात्कारणात् प्रातिशाख्ये शिक्षायां च मध्यमां वृत्तिमाश्रित्य
कालानां मात्रादिकानां निर्णयः कृतः। सैव अस्माभिरपि समाश्रिता॥ नित्यं
प्राकूपदसंबंधं चादिं कुर्याद्विचक्षणः। चकारादिद्विपदं प्राकूपदेन संबंधं
यथा भवति तथा क्रियतां प्रश्राद्वादिपदेन परेणपदेन संबंधं क्रियतां। य २७
था॥ विमुंचमे प्रार्थयतु॥ गीती शीघ्री शिरःकंपी तथा लिखितपाठकः। अ

नर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः ॥११०॥ एतेषट्पाठकेषुअध्येतृषु
अधमाः। तानाह। यः गीती। गीतंविहितकालाधिक्यंवर्णानांतदस्यास्ती
तिगीती। शीघ्रीतुशीघ्रंतुद्रुततातदस्यास्तीतिशीघ्री। शिरःकंपीशिरःकं
पयति। तथालिखितपाठकःलिखितेरूपायैरध्येता। अनर्थज्ञः लक्षणज्ञा
नरहितः प्रयोजनज्ञानरहितोवा। अल्पकंठः। संवृत्तकंठइति। सुव्यक्त
मक्षरंयच्चयत्रमाधुर्यसंयुतं। सुव्यक्तपदविच्छेदोयच्चधैर्यगुणान्वितं॥
१११॥ लयेसमर्थतायाचस्वरनिर्मलताचया। षट्संख्यकागुणाह्येतेवि
हिताःपाठकस्यच ॥११२॥ षट्संख्यकाएतेपाठकस्यअध्येतुर्गुणाः। ध
र्मविहितास्तानाह। अक्षरंयत्सुव्यक्तंअसंकीर्णमित्यर्थः। यच्चमाधुर्य
संयुतं। अयमपिभावप्रधानोनिर्देशः। माधुर्यहृद्यताविहितस्थानकरणे
नियमेनभवेत्। सुव्यक्तश्च। संकीर्णः। पदानांविच्छेदः। धैर्यमव्यग्रता। ल

ये नोपादौ समर्थता। स्वराणां निर्मलता। निसादिदोषराहित्यं च यानि एतदू
ति संबंधः। वर्गाणां प्रथमा वर्णाः स्वराश्च ब्रह्मजातयः। द्वितीयाश्च तृतीया
श्च चतुर्थाः क्षत्रजातयः॥१३॥ अंतस्थाश्चोत्तमाश्चैव वैश्याः खलु समीरिताः।
अनुस्वारो विसर्गश्च तथा ऊष्माणः शूद्रजातयः॥१४॥ जातिविशेषस्य प्रयोज
नं वक्ष्यति। स्पष्टोऽर्थः। उदात्तो ब्रह्मजातिः स्यान्नीचो राजन्य उच्यते। स्वरितो
वैश्यजातिश्च प्रचयः शूद्र ईरितः॥१५॥ स्पष्टोऽर्थः। गोकर्णाकृति हस्तेन नि
र्दिशेद्दक्षिणे स्वरं॥ स्वरा द्वस्वा स्वरा भक्तिं प्रचयत्वं नयेद्बुधः॥११६॥ तस्य मा
त्रा भवेदेका विरामे च निवर्त्तिषु॥ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिंतयन्॥
११७॥ स्वरमुदात्तादिकं गोकर्णसमानाकारे दक्षिणे हस्ते निर्दिशेत्॥ अस्या २८
पि प्रयोजनं वक्ष्यते॥ अंगुलीषु च सर्वासु नयेदंगुष्ठमेव च। शिरः कंठं विहाय ये
व स्वरस्यासौ विधीयतां॥११८॥ अंगुलीषु सर्वासु चतुर्ष्वित्यर्थः। स्वरस्योदात्ता

दृकुस्य। कनिष्ठिकानामिकाचमध्यमाचप्रदेशिनी। नीचस्वारधृतोदात्तान्क्र
मेणैव विनिर्दिशेत्॥११९॥ पदान्तस्यनकारस्य यवहेषु परेषु च॥ तयोर्नका
रयादेशोऽनुसंयुतत्वं न विद्यते॥१२०॥ ब्रह्मवेदमित्यर्थः॥ उक्तार्थे शिक्षायां
संमतिमाह। व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्। भीतापतनभेदा
भ्यां तद्वद्वर्णान्प्रयोजयेत्॥१२१॥ स्पष्टोऽर्थः। गुरुत्वं लघुता साम्यं ह्रस्वदी
र्घप्लुतानि च। लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः॥१२२॥ स्वरितोदा
त्तनीचत्वं श्वासो नादोंगमेव च॥ एतत्सर्वं तु विज्ञेयं छंदोभाषामधीयता
१२३॥ अन्यासंमतिमाह। नातिव्यक्तं न चाव्यक्तमेवं वर्णानुदीरयेत्। पयः
पूर्णमिवामत्रं हरं धीरो यथामति॥१२४॥ स्मृतिकारस्तु संमतिमाह। उच्चारे
स्परयाभक्त्या सार्वकालमतंद्रितः॥ यज्जाति स्खलनं तेषां तज्जातिहननं
यतः॥१२५॥ तेषां वर्णानां यज्जातिस्खलने अन्यथोच्चारणे तज्जातिहननं

नसम्युक्तोदोषइत्यर्थः।ह्रस्वाद्भ्रष्टः स्वराद्भ्रष्टो वर्णात्कालान्नयार्थतः॥प्रयो
गाच्चपरिभ्रष्टोनवेदफलमश्नुते॥१२५॥ह्रस्वाद्भ्रष्टः ह्रस्ववर्णनिर्देशरहितः
स्वरादुदात्तादेर्भ्रष्टः अल्पधोच्चारयन्॥ह्रस्वहीनंतुयोधीतेस्वरवर्णविव
र्जितं।ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छति॥१२६॥वियोनिंनरकपात
मित्यर्थः।मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥सवाग्व
ज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्॥१२७॥स्वरवर्णंस्फुटंमत्वा
सम्यक्पश्चसमुच्चरेत्॥अत्यत्कालफलंतस्यतत्रतत्रसमीरितं॥१२८॥तत्रत
त्रेतिपुराणादिष्वित्यर्थः॥ह्रस्वेनवेदंयोधीतेस्वरवर्णार्थसंयुतं॥ऋग्यजुःसा
मभिःपूतोब्रह्मलोकेमहीयते॥१२९॥पदक्रमविशेषज्ञोवर्णक्रमविचक्षणः॥ २९
स्वरमात्राविभागज्ञोगच्छेदार्यसंसदं॥१३०॥सूरिदेवबुधेंद्रस्यनंदनेनमहा
त्मनः।प्रणीतंकेशवाचार्येणलक्षणंसर्वसंमतं॥१३१॥इत्यालमूरिमंत्रिभट्टविरचि
तेसर्वसंमतशिक्षाविवरणेमतिनिर्मलं॥ ॥ संख्या ६००